श्री दत्तात्रेय पंजरं

श्री दत्तात्रेय पंजरं

अस्य श्रीदत्तात्रेयपंजरमहामंत्रस्य शबररूप महारुद्रऋषिः |
अनुष्टुप्छंदः | श्रीदत्तात्रेयो देवता |
आं बीजं | ह्रीं शक्तिः | क्रों कीलकं |
ममसर्वाभीष्टसिद्ध्यर्थे जपे विनियोगः | |

ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः |
लोकत्रयेण दिग्बंधः |

ध्यानं -
व्याख्यामुद्रां करसरसिजे दक्षिणे संदधानो
जानुन्यस्तापरकरसरोजात्त वामोन्नतांसः |
ध्यनाद्ध्यानात् सुखवरवशादर्थमामीलिताक्षो
दत्तात्रेयो भसित धवलः पातु न कृत्तिवासाः | |

(पंचपूजाः)
ॐ नमो भगवते दत्तात्रेय नमः |
ॐ महागंभीराय नमः |
ॐ वैकुंठवासाय नमः |
ॐ शंखचक्रगदा नमः |
ॐ त्रिशूलधारिणे नमः |
ॐ वेणुनादाय नमः |
ॐ दुष्टसंहारकाय नमः |
ॐ शिष्टपरिपालकाय नमः |
ॐ नारायणास्त्रधारिणे नमः |
ॐ चिद्रूपाय नमः |
ॐ प्रज्ञानंब्रह्ममहावाक्याय नमः |
ॐ सकलकर्मनिर्मिताय नमः |
ॐ सच्चिदानंदाय नमः |
ॐ सकललोकसंचारणाय नमः |

ॐ सकलदेवतावशीकरणाय नमः |

ॐ सकललोकवशीकरणाय नमः |

ॐ सकलराजजनवशीकरणाय नमः |

ॐ सकलभोगवशीकरणाय नमः |

ॐ लक्ष्मीऐश्वर्यसंपत्कराय नमः |

ॐ मम मातृ-पितृ-पुत्रादिरक्षणाय नमः |

ॐ गुडोदककलशपूजाय नमः |

ॐ अष्टदळपद्मपीठाय नमः |

ॐ बिंदुमध्ये लक्ष्मीनिवासाय नमः |

ॐ ॐ ओं ॐ ओं ॐ ओं ॐ अष्टदलबंधनाय नमः |

ह्रीं ह्रीं ह्रीं ह्रीं चतुष्कोनबंधनाय नमः |

ह्रां ह्रां ह्रां ह्रां चतुर्द्वारबंधनाय नमः |

ॐ ऋग्यजुस्सामाथर्वणा प्रणवसमेताय

ॐ उदात्तानुदात्तस्वरितप्रवचनाय नमः |

ॐ गायत्री-सावित्री-सरस्वती-देवताय नमः |

ॐ अवधूताश्रमाय नमः |

ॐ अजपागायत्रीसमेताय नमः |

ॐ सकलसंपत्कराय नमः |

ॐ परमंत्र-परयंत्र-परतंत्रोच्चाटनाय नमः |

ॐ आत्ममंत्र-आत्मयंत्र-आत्मतंत्रसंरक्षणाय नमः |

ॐ सदोचित-सकलमत-स्थापिताय नमः |

ॐ सद्गुरुदत्तात्रेय हुं फट् स्वाहा ||

इति श्रीदत्तात्रेयपंजरं संपूर्णं ||